# बोर्ड कृतिपत्रिका : मार्च 2018

## संस्कृत - मकरन्दः।

**Time: 2 Hours** **Max. Marks : 40**

**सूचना:**

i. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

ii. यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

iii. आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

**प्रथमः विभागः – गद्यम्।**

**1. अ. गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** **[12]**

**अ.1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)** **(1)**

i. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।
श्रुतः ............. शब्दः अयम्। किन्तु तस्य समग्रार्थः न .............।
(अहम्/मया) (ज्ञातः/ज्ञातवान्)

ii. कः कं वदति? **(1)**
वयम् अपि तथैव करिष्यामः।

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। **(1)**
स्वार्थसिध्दये अनुष्ठितं विधियुक्तम् आचरणं नाम अवैधाचारः।

कुमारः – तात, अप्यद्य वयं सर्वे राष्ट्रीयपुरस्कारप्राप्तं चित्रपटं प्रेक्षितुं गच्छामः?
जनकः – जात, किन्तु चित्रपटस्यास्य प्रवेशपत्राणि सद्यः नोपलभ्यन्ते इति श्रुतं मया। अद्य तु रविवासरः। तर्हि किमु वक्तव्यम्?
कुमारः – जानामि तत्सर्वं, किन्तु अधिकमूल्यं दत्त्वा प्रवेशपत्राणि लभ्यन्ते।
जनकः – सौम्य, कथं त्वया ज्ञायते?
कुमारः – वयस्येन कथितम्। तेनापि तथा क्रीतानि। वयमपि तथैव करिष्यामः।
जनकः – पुत्र, अपि जानासि त्वं यद् असावनुचितः मार्गः? एषः अवैधाचारः।
कुमारः – श्रुतः मया शब्दोऽयम्। किन्तु तस्य समग्रार्थः न ज्ञातः।
जनकः – श्रुणु तर्हि। केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं, नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः।
कुमारः – स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया। किमेष अवैधाचारः?

**अ.2. स्वमतप्रकटनम्-** **(2)**
'अवैधाचारेण समाजस्य हानिः भवति' एतस्मिन् विषये ३०/४० शब्दपरिमितां भवत्प्रतिक्रियां माध्यमभाषया लिखत।

**ब. गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब.1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। **(1)**
अस्यां क्रीडायां ......... द्वादश .......... भवन्ति।
(प्रतिसङ्घं/प्रतिसङ्घस्य) (गोलरक्षकाः/ क्रीडापटवः)

(ii) पूर्णवाक्येन उत्तरं लिखत। **(1)**

कबड्डी-क्रीडायां कति क्रीडापटवः बहिः तिष्ठन्ति?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत। **(1)**


वैयक्तिकक्रीडासु कबड्डी इति भारतीयक्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः। काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिकक्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता। 'हुतुतू' इति तस्या अपरनाम। तुकाराममहाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा। वङ्गदेशे 'हुडू', दक्षिणभारते 'चेडुगुडु', उत्तरभारते 'कबड्डी' इति नाम्ना विख्यातैषा क्रीडा।

अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटवः एव खेलन्ति। पञ्च क्रीडापटवो बहिस्तिष्ठन्ति। एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति।

**ब.2. पृथक्करणम् –**

**गद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** **(2)**




**क. गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**क.1.** पृथक्करणम् – **(2)**

यथाक्रमं घटनाः लिखत।

i. प्रभाते संदेशप्रापणम्।

ii. अन्तर्जालात् प्राप्तं संज्ञापनं वरदां प्रति प्रेषणम्।

iii. वरदायाः सप्ताश्चर्यविषये जिज्ञासा।

iv. सप्ताश्चर्यविषयकज्ञानार्थम् अन्तर्जालस्य उपयोगः।

सखि वरदे, शुभप्रभातम्। अद्य प्रभाते त्वत्तः सन्देशः प्राप्तः। समाजशास्त्रविषयस्य प्रकल्पार्थं सप्ताश्चर्यविषये ज्ञातुमिच्छसि इति मन्ये। तदर्थं अन्तर्जालात् प्राप्तमिदं संज्ञापनं प्रेषयामि।

विश्वे तथा सर्वधर्मेषु सप्ताङ्कः विशेषतामादधाति। अङ्कः एष भाग्यदर्शकः स्वामित्वद्योतकः च। यथा सप्तस्वराः सप्तदिनानि तथैव सप्ताश्चर्याणि जगति विशेषरूपेण ख्यातानि। सप्तशून्यशून्यद्वितमे ख्रिस्ताब्दे (2007) नूतनानि विश्वसप्ताश्चर्याणि उद्घोषितानि यानि शताधिककोटिरसिकजनैः विश्वतः निर्वाचितानि।

प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम्-फेव्हिन-अम्फीथिएटरम्। एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राटव्हेस्पॅशियनमहोदयेन निर्मितम्।

द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः। उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउनटी-नृपेण निर्मितैषा।

त्वं जानास्येव यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः। एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा।

एतद् अभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम्। शहाजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम्। पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च।

**क.2. शब्दज्ञानम्। (केऽपि द्वे कृती कुरुत।)** **(2)**

(1) (i) चतुर्थं पदं लिखत। **(½)**

अर्धवर्तुलाकारं: प्रेक्षागृहम्  : : विशाला : .............।

(ii) समूहेतरं पदं लिखत। **(½)**

जगति, मनसि, विश्वे।

(2) विलोमशब्दं लिखत। **(1)**

(i) दूषणम्  (ii) प्रेषित:।


(3) गद्यांशत: तृतीयाविभक्ते: द्वे रूपे लिखत। **(1)**

**द्वितीय: विभाग: – पद्यम्।**

**2.अ. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** **[10]**

**अ. 1. पृथक्करणम्।**

**पद्यांशत: उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत।**




तिष्ठन्त्येते यथास्थानं नगा होकनिकेतना:।
ते त्यजन्ति तत: स्थानं प्रातिलोम्यान्न वेतस:।।1।।

वेतसो वेगमायातं दृष्ट्वा नमति नापरे।
सरिद्वेगे व्यतिक्रान्ते स्थानमासाद्य तिष्ठति।।2।।

कालज्ञ: समयज्ञश्च सदा वश्यश्च नोद्धत:।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतस:।।3।।

**अ.2. शब्दज्ञानम्।** **(1)**

(i) 'गृह्णन्ति' शब्दस्य कृते पद्यांशे आगत: विलोमशब्द: अस्ति ................।

(ii) 'सततम्' शब्दस्य कृते पद्यांशे आगत: पर्यायशब्द: अस्ति ................।

**(ब) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब.1.** तात्पर्यलेखनम्।

प्रथम/द्वितीयसुभाषितस्य तात्पर्यं माध्यमभाषया लिखत। **(2)**

एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ।।1।।
अत्यम्बुपानान्न विपच्यतेऽन्नं निराम्बुपानाच्च स एव दोष:।
तस्मान्नरो  वह्निविवर्धनाय मुर्हुमुर्हुवारि पिबेदभूरि।।2।।
भोजनान्ते पिबेत्तक्रं वासरान्ते पिबेत् पय:।
निशान्ते च पिबेद्वारि त्रिभी रोगो न जायते।।3।।

**ब.2.** अवबोधनम्। पूर्णवाक्येन उत्तरं लिखत। **(1)**

पयः कदा पिबेत्?

**(क) स्मरणम्।**

**क.1.** श्लोकांशान् मेलयत। **(2)**

| | |
|---|---|
| (1) पञ्चैते गृहिणः पोष्या | न हता भवन्ति। |
| (2) पिको वसन्तस्य | शीलमेतत्प्रशस्यते। |
| (3) अनुग्रहश्च दानं च | गुणं न वायसः। |
| (4) शस्त्रैहतास्तु रिपवो | इतरे च स्वशक्तितः। |

**क.2.** श्लोकपूर्तिः।

सुभाषितं शुद्धं पूर्णं च लिखत। (केवलं 1) **(2)**

(1) शनैः शनैश्च ............ कदाचन।।

(2) साम्नैव ............ पटोलेन।।

**तृतीयः विभागः – व्याकरणम्।**

**3. यथानिर्देशं कृती कुरुत। (5 उपप्रश्नाः लेखनीयाः।)** **[10]**

**अ.** नाम/सर्वनामपदानां पृथक्करणम् । (कोष्ठकपूरणम्) **(2)**

(6 पर्यायेषु 4 पर्यायाः लेखनीयाः।)

| | षष्ठी एकवचन Genitive Singular | पञ्चमी बहुवचन Ablative Plural | तृतीया एकवचन Instrumental sing. |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(राज्ञा, वाग्भ्यः, कस्य, तेभ्यः, सर्वेण, गुणवतः)

**ब.** क्रियापदानां पृथक्करणम्। (कोष्ठकपूरणम्) **(2)**

(6 पर्यायेषु 4 पर्यायाः लेखनीयाः।)

| द्वितीय-भविष्यकालः II Future tense | परोक्ष-भूतकालः Perfect past tense | प्रथम-भूतकालः Imperfect past tense | विध्यर्थः Potential mood | आज्ञार्थः Imperative mood | वर्तमानकालः Present tense |
|---|---|---|---|---|---|
| | | | | | |
| | | | | | |

(उवाच, करिष्यति, अश्रुणोत्, मन्यते, भवतु, जानीयात्)

**क.** समासः। (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **(2)**

यथापेक्षं रिक्तस्थानानि पूरयत।

| समस्तपदानि | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| 1. ............ | सेवायाः भावः। | षष्ठी तत्पुरुषः। |
| 2. असमर्थः | ............। | नञ् तत्पुरुषः। |
| 3. समग्रार्थः | समग्रः अर्थः। | ............। |
| 4. ............ | स्थानम् अनतिक्रम्य। | अव्ययीभावः। |
| 5. वस्त्रस्यूतः | ............ | मध्यमपदलोपी। |
| 6. शान्तचेतसम् | शान्तं चेतः यस्य सः। तम्। | ............। |

**ड.** उपपदविभक्तिः । (6 पर्यायेषु 4 पर्यायाः लेखनीयाः ।) **(2)**

उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

i. ............ विना कथं चिकित्सकः भवेत्?

(सेवाभावस्य/सेवाभावेन)

ii. मेघाः ............ जलं यच्छन्ति।

(अस्मभ्यं/अस्मान्)

iii. ............ पुरतः सूर्यखगः उपस्थितः।

(अर्जुनेन/अर्जुनस्य)

iv. अलम् ............ ।

(विवादेन/विवादाय)

v. आचार्यः ............ ज्ञानं यच्छति।

(शिष्यं/शिष्येभ्यः)

vi. बालिका ............ स्पृहयति।

(आभूषणं/आभूषणाय)

**इ.** सन्धिं/सन्धिविग्रहं कुरुत। (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।) **(2)**

रिक्तस्थानपूर्तिः।

i. यदुक्तम् = यद् + ............।

ii. दण्डोऽपि = ............+ अपि।

iii. ............ = भवति + इति।

iv. प्रजाहताश्च = ............ + च।

v. विधिनापि = विधिना + ............।

vi. ............ = तस्मिन् + एव।

**फ.** **सङ्ख्यावाचकविशेषणानि।** (6 पर्यायेषु 4 पर्यायाः लेखनीयाः।)

रिक्तस्थानपूर्तिः। **(2)**

i. दिने अहम् ............ भोजनं करोमि।

(Twice) (दोनदा)

ii. चैत्रमासः ............ मासः वर्षस्य।

(1st) (१ ला)

iii. कालिदासेन ............ नाटकानि लिखितानि।

(3) (३)

iv. भदवद्गीतायाः ............ अध्यायाः सन्ति।

(18) (१८)

v. तस्य स्वागतार्थं ............ पक्वान्नानि कृतानि।

(5) (५)

vi. ............ प्रमुखाः दिशः सन्ति।

(4) (४)

## चतुर्थः विभागः – लेखनकौशलम्।

**4. अधोनिर्दिष्टे कृती कुरुत। –** **[8]**

**अ. वाक्यनिर्माणम्। –** **(4)**

तालिकातः शब्दान् चित्वा अर्थसङ्गतानि 4 वाक्यानि लिखत।

| | | |
|---|---|---|
| गायकः | विद्यालयं | करोति। |
| सैनिकः | परोपकाराय | गच्छति। |
| शिशुः | नाट्यगीतं | जीवति। |
| सत्पुरुषः | रक्षणं | गायति। |

**ब. कथापूर्तिः।** **(4)**

मञ्जूषातः उचितान् शब्दान् चित्वा 4 रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत।

एकदा सर्वे ग्रामस्थाः सम्मील्य एकस्य ग्रामीणस्य ……… चर्चाम् अकुर्वन्। बहुभिः जनैः स प्रशंसितः। अन्ततः एकः जनः अवदत् सः उत्तमः जनः अस्ति, इत्यत्र नास्ति सन्देहः । परन्तु तस्मिन् द्वौ दोषो वर्तेते इति मे प्रतिभाति। तच्छ्रुत्वा अपरः अपृच्छत् कौ तौ दोषौ? ……… इच्छामि। सः शीघ्रकोपी तथा कोपावेशे सः कार्याकार्यविवेकं न रक्षति। संयोगवशात् यस्य विषये वार्तालापः प्रचलितः आसीत् स एव तत्र आगतः। अन्तिमं वाक्यं तस्य श्रवणपथे आपतितम्। स्वस्य आलोचकस्य उपरि उत्पत्य ग्रीवया तं गृह्णन् सः अपृच्छत्, रे शठ, मां ……… इति वदसि? किं ते धाष्टर्यम्। तव कण्ठनोदनं करोमि अधुना। उपस्थिताः अन्ये जनाः तस्य रक्षणार्थं प्रयतमानाः अवदन्, भवान् स्वयमेव प्रमाणीकृतवान् यत् तस्य ……… न मिथ्या।

(आलोचना, शीघ्रकोपी, विषये, ज्ञातुम्)